श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री कूर्मपुराणे

# ॥ श्री कूर्मस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कूर्मस्तुतिः ॥

मुनय ऊचुः।
नमस्ते कूर्मरूपाय विष्णवे परमात्मने।
नारायणाय विश्वाय वासुदेवाय ते नमः ॥ 1 ॥

नमो नमस्ते कृष्णाय गोविन्दाय नमो नमः।
माधवाय च ते नित्यं नमो यज्ञेश्वराय च ॥ 2 ॥

सहस्रशिरसे तुभ्यं सहस्राक्षाय ते नमः।
नमः सहस्रहस्ताय सहस्रचरणाय च ॥ 3 ॥

ओं नमो ज्ञानरूपाय विष्णवे परमात्मने।
आनन्दाय नमस्तुभ्यं मायातीताय ते नमः ॥ 4 ॥

नमो गूढशरीराय निर्गुणाय नमोऽस्तु ते।
पुरुषाय पुराणाय सत्तामात्रस्वरूपिणे ॥ 5 ॥

नमः साङ्ख्याय योगाय केवलाय नमोऽस्तु ते।
धर्मज्ञानाभिगम्याय निष्कलाय नमोऽस्तु ते ॥ 6 ॥

नमस्ते योगतत्त्वाय महायोगेश्वराय च।
परावराणां प्रभवे वेदवेद्याय ते नमः ॥ 7 ॥

नमो बुद्धाय शुद्धाय नमो मुक्ताय हेतवे।
नमो नमो नमस्तुभ्यं मायिने वेधसे नमः ॥ 8 ॥

नमोऽस्तु ते वराहाय नारसिंहाय ते नमः।
वामनाय नमस्तुभ्यं हृषीकेशाय ते नमः॥ **9** ॥

नमोऽस्तु कालरुद्राय कालरूपाय ते नमः।
स्वर्गापवर्गदात्रे च नमोऽप्रतिहतात्मने॥ **10** ॥

नमो योगाधिगम्याय योगिने योगदायिने।
देवानां पतये तुभ्यं देवार्तिशमनाय ते॥ **11** ॥

भगवंस्त्वत्प्रसादेन सर्वसंसारनाशनम्।
अस्माभिर्विदितं ज्ञानं यज्ज्ञात्वामृतमश्नुते॥ **12** ॥

श्रुताश्च विविधा धर्मा वंशा मन्वन्तराणि च।
सर्गश्च प्रतिसर्गश्च ब्रह्माण्डस्यास्य विस्तरः॥ **13** ॥

त्वं हि सर्वजगत्साक्षी विश्वो नारायणः परः।
त्रातुमर्हस्यनन्तात्मा त्वामेव शरणं गताः॥ **14** ॥

॥ श्री कूर्मस्तुतिः समाप्ता॥